International Journal of Sanskrit Research 2021; 7(1): 75-80

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(1): 75-80
© 2021 IJSR
www.anantaajournal.com
Received: 05-11-2020
Accepted: 14-12-2020

**श्यामल शुभा भञ्जः पण्डितः**
पि एइच डि उपाधिप्राप्ता ।
पश्चिमबङ्ग, भारतः।

**Corresponding Author:**
**श्यामल शुभा भञ्जः पण्डितः**
पि एइच डि उपाधिप्राप्ता ।
पश्चिमबङ्ग, भारतः।

# वैदिकसाहित्ये उपमा इत्यलङ्कारस्य विस्तार:

**श्यामल शुभा भञ्जः पण्डितः**

**||संक्षिप्तसारः||**
सुविशालमिदं वैदिकसाहित्यत्म् । प्राचीनकालात् गुरुशिष्यपरम्परया प्रवाहितमियं श्रुतिः । वेदेषु वेदेयागयज्ञादयः प्राधान्येन विधृताः। तथापि वैदिकसाहित्यस्य साहित्यगुणमलङ्कारमाधुर्यम्च पण्डिताणां हृदयमहरति। यथा शव्दालङ्काराः तथा उपमारूपकादयः अलङ्काराश्चापि वेदे परिदृश्यन्ते। अस्मिन् सन्दर्भे वैदिकसाहित्ये उपमाप्रयोगनैपुण्यं विधृतुमिच्छामि।

**शब्दसंकेतः** - वेदस्यार्थ, कतिप्रकाराः वेदाः, अलङ्कारस्य स्वरूपम्, उपमायाः तात्पर्यम्, वेदेषु अलंकारप्रयोगवैशद्यम्।

## आमुखम्

वेदः इत्यर्थ ज्ञानम्। न तु लौकिकमलौकिकज्ञानम् । - "इष्टप्राप्त्यानिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थ वेदयति स वेदः।"[१] इष्टप्राप्तिः अनिष्टपरिहारः तथैव संसारस्य मंगलसाधनमेव वेदपाठस्याभीष्टम्। अस्य परमज्ञानस्य कणामात्रमासाद्य वयं खलु परमानन्दं लभामहे।

-'आनन्दरूपममृतं यद्विभाति।"[२]
तथा चोक्तं मनुमहाराजेन - "वेदोहखिलधर्ममूलम्" [३]

अर्थात् वेद एव अखिलधर्माणामाधाररूपम्। भारतीयसभ्यतायाः, अस्माकं धर्मसंस्कारानां आकरः खलु वेदः। प्राचीनकालात् गुरुशिष्यापरम्परया प्रवाहिता इयं श्रुतिः । 'श्रूयते इयं श्रुतिः ' स्वप्रकाशोहयं वेदः।

"युगान्तेहन्तर्हितान्वेतिहासान्महर्षयः
लेभिरे तपसा पूर्वमनुज्ञाता स्वयंभूवा"[४]

ततः "न कश्चित् वेदकर्तास्ति"।[५]

ऋषयः तथैव मन्त्राणां द्रष्टाः, न तु मन्त्रकाराः।ऋष् इति दर्शनात्।

वेदः कतिप्रकाराः इत्यस्मिन् विषये अद्यापि विचारयन्ति पण्डिताः। केचित् वदन्ति ऋक्-साम-यजु इति त्रयी एव। केचित् वा अथर्ववेदमङ्गीकृत्य चतुर्वेद इति मन्यन्ते।[६] प्रत्येकस्य वेदस्य संहिता - ब्राह्मण-आरण्यक- उपनिषत् इति चतुर्भागानि वर्तन्ते। तत्र मन्त्रभागं संहिताभागं वा वेदिकसाहित्यस्य आदौ सूच्यते। ऋषयः देवतानामुद्दिश्य तेषां हृदकमलस्हितं आवेगं निवेदयन्ति। यद्यपि नास्त्यत्र समासनिगडितानां गुरुभारपदानां समाहारः तथापि अयं स्वभावरमणीयः नास्त्यत्र संशयः।

'उपमा कालिदासस्य' इति सर्वलोकविदिता। तथापि वैदिकसाहित्यमपि अलङ्कारमण्डितं सुशोभितम्। एतेषामलकाराणां मध्ये उपमा इत्यलङ्कारस्य प्रयोगं वाहुल्येन अस्माकं दृष्टिपथमायाति।

- **अलङ्कारस्वरूपम्।**

अथ किञ्चित् अलङ्कारविषयिकी आलोचना अस्मिन् निवन्धे कर्तुमिच्छामि।अलङ्करोति इति अलङ्कारः। अलमाभूषणमित्यर्थः। तथैव देहसौन्दर्यं काव्यसैन्दर्यं च वर्द्धयति इति अलङ्कारः।

प्रोक्तं भामहाचार्योन- "न कान्तमपि निर्भूषं वनितामुखम्"[७]

अलंकार इति पदेन तत्र सौन्दर्यवोधं प्रकिशितम् । सौन्दर्यविधायकमाभूषणमलङ्कारः। अलङ्कारो यथा कवचकूण्डलाणामाभूषणं तथा काव्यालङ्कारोहपि काव्यसौन्दर्यं वर्धयति।

तथा चोक्तम् -"काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते।"[८]

अलङ्कारः काव्यशोभां करोति।

'अलङ्कृति अलङ्कार:'इत्यनेन एव स्वयं सौन्दर्यम्।तथा "अलंक्रियन्ते शोभा साध्यन्तेहनेन"" इति करणवाच्येन अलङ्कार: इत्यर्थः।

"काव्यं ग्राह्यमलङ्कारात्"[९]

अर्थात् अत्र काव्येषु अलङ्काराणां प्राधान्यमेव स्वीकृतम्।

"सौन्दर्यमलङ्कारः"[१०] इत्यनेन अलङ्कारः खलु स्वयं सौन्दर्यमित्यर्थम्।

काव्येषु अलङ्काराणां प्राध्यानादेव काव्यशास्त्रमलङ्कारशास्त्रमिति रूपेण स्वीकृतम्। शब्दालङ्कारर्थालंकारश्चेति अलङ्कारः । एषु अर्थालङ्कारेषु उपमा आदिस्वरूपा। "चन्द्रमिव मुखम्" अत्र चन्द्रमिव सुन्दरं मुखं प्रतीयते। उपमा इत्यनेन सादृश्यं साध्यर्मंच विलसितम्।अर्थालङ्कारेषु उपमायाः प्राधान्यमेव सूच्यते।

**उक्तं च राजशेखरेन -**

"अलङ्कारशिरोरत्नं सर्वस्वं काव्यसम्पदाम्।
उपमा कविवंशस्य मातैवेति मतिर्मम् ||" [११]

तथा आलङ्कारिकेन महिमभट्टेन सर्वेष्वर्थालङ्कारेष्वुपमा प्रधाना इतुच्यते।

सर्वेषु अर्थालङ्कारेषु उपमा प्राणस्वरूपा। अप्पयदीक्षितमहोदयेन उपमालङ्कारः काव्यनाट्ये नृत्यति मनोरञ्जयति नटीस्वरूपा इत्युच्यते। जगन्नाथाचार्यस्य मतेन सादृश्ययुक्तं सुन्दरवाक्यमिति उपमा।

ततः साहित्यदर्पणकारः तेषामुपजीव्यत्वेन प्रारम्भे अलङ्कारोहयमालोचयति साहित्यदर्पणग्रन्थे।

तथा पूर्णोपमा-भूतोपमा-रूपोपमा-लुप्तोपमा चेति अलङ्काराः वेदेषु परिदृश्यतन्ते भूयिष्ठेन। तथा - "इवेति भाषायां चान्वध्यायञ्च"[१२]

अर्थात् भाषायां यथा तथा वेदे इवेति अलंकारस्य प्रयोगं सर्वत्रैव परिलक्षितम्।न इति भाषायां प्रतिषेधार्थे वेदेषु उभयार्थे विद्यते।वेदः तथैव अलंकारशास्त्रस्य प्रारम्भमेव मन्यन्ते पण्डिताः।

निरुक्तकारः यास्क: गार्गाचारयस्य मतमुल्लेखितः - "अथात उपमा। यदतत्तत्सदृशमिति गार्ग्यः"[१३]

अत्र निरुक्तकारः गार्गाचार्यस्य मतमालोचयति 'यदत्तत्स'इत्यनेन। सादृश्यमेव उपमालङ्काहस्य मूलम्।

**वेदेषु उपमाप्रयोगम् -**

वेदोहस्माकमखिलधर्ममूलम् । यागयज्ञादयः आचारधर्माचरणानि वेदुषु विधृतम्। तथापि वैदिकसाहित्यस्य काव्यसौन्दर्यं रूपलावण्यं नापि अस्वीकर्तुं शक्नुवन्ति पण्डिताः। संहिताभागेषु ऋषयः तेषां भक्तिरूपावेगं देवतानामुद्दिश्य निवेदयन्ति। ब्राह्मणसाहित्ये यागयज्ञादयः नैपुण्येन विधृताः। उपनिषत् साहित्ये सुगभीरदर्शनभावना च सन्निविष्टा। वैदिकसाहित्ये अलङ्कारेषु उपमा मुख्यरूपेण प्रयुक्ता। मानवसभ्यतायाः उषाकाले एतादृशमलङ्कारप्रयोगं दृष्ट्वा पण्डिताः चमत्कृता: भवन्ति।

**प्रथमे मण्डले उक्तं च ऋषिणा-**

"वायवा याहि दर्शतेमे सोमा अरंकृताः ।
तेषां पाहि श्रुधी हवम्"[१४]

अत्र 'अलङ्कृताः' इति 'अलङ्कारः' इत्यर्थे प्रयुक्तः। "अरंकृता अलङ्कृतास्तेषां पिव शृणु नोह्वानम्।" [१५]
अत्र 'अरंकृता'इति अलङ्कृता इत्यर्थे प्रयुक्ता। पुन"अभिषवादिसंस्कारोलंकारः"[१६]
अभिषवादिधर्मसंस्कारैः अरंकृताः इमे सोमाः। काव्यालङ्कारैः सुशोभिताः वा

वेदेषु अलङ्कारमिति पदं पौनपौन्येन प्रयुक्तम्। यथा-
"ईलते त्वामवयवः कण्वासो वृक्तवर्हिषः। हविष्मन्तो अरंकृतः।"[१] अरंकृतः अलङ्कृत इत्यर्थम्।
"घृतं न पूतं तनूररेपाः शुचि हिरण्यम्"[१८] अत्र हिरण्यम् अलङ्कारस्वरूपमाभूषणम्।
"श्रिये रुक्मो न रोचत उपाके"[१९]
'रूक्मः' सौन्दर्यविधायकमलङ्कारः।
अलङ्कारः यथा देहसौन्दर्यं तथा काव्यसौन्दयमपि वर्धयति।
आभूषणमालङ्कारः काव्यसौन्दर्यप्रवर्धकालंकारः भवति ।

**निरुक्तकारस्य यास्कस्य भावनायामुपमा -**

उक्तंच यास्केन निरुक्तग्रन्हस्य प्रथमे अध्याये - "उच्चावचष्वर्थेषु निपतन्ति अप्युपमार्थे। अपि कर्मोपसंग्रहार्थे अपि पदपूरणा:। तेषामेते चत्वार उपमार्थे प्रयुक्ताः।"[२०]
उच्चावचष्वर्थेषु अनेकप्रकारेषु अर्थेषु निपाताः निपतन्ति।- (१) उपमार्थे (२) कर्मोपसंग्रहार्थे (३) मन्त्राणां पादपूरनार्थे।
इव-न-चित्-नु इति निपाता: वेदेषु उपमार्थे प्रयुक्ताः। उदाहरणानि यथा -

यथा इति योगेन कर्मोपमा।
"यथा वातो यथा वनं यथा समुद्र एजति।"[२१]
रूप इत्यतेन रूपोपमा।
"हिरण्यरूपः स हिरण्यसंदगपां न पातसदु हिरण्यमवर्णः"[२२]
रूप्यते इति रूपं शरीरम्। हिरण्यरूपः स्वर्णमिव लावण्यम्।
वत् योगेन सिद्धोपमा।
"प्रियमेधवदत्रिवज्जातवेदो विरूपवत्"[२३]
अत्र चत्वारो दृष्टान्ताः।
इव योगेन उपमा ।
"जायेव पत्य उषती सुवासा उषा हस्त्रेव नि रिणीते अप्सः"[२४]

उषासूक्तस्य लोकप्रसिद्धः मन्त्रोहयम्। “यथा च लोके दुकूलादिशोभनवसना स्वलङ्कृताः पूर्वं रजोदर्शनसमयेमलिनवस्रा सती स्नानानन्तरनं शोभनवस्राभराणादिना शोभमाना विशेषेन पतिं भोगाय काखषन्ती तने सह संक्रीडते।“(इति

सायनभाष्यम्।) तथैव उषा मलिनवस्त्ररूप अन्धकारात् प्रकाशिता सती सूर्येन सह संक्रीडति।

न योगेन उपमा।

"सूर्यो देवीमुषसं रोचमानां मर्यो न योषामभ्येति पश्चात्"[२५]

यथा नराः लोके सुन्दरीं योषामनुसरन्ति, तथैव सूर्योहपि देवीमुषसमनुसरति। मनोज्ञा एतादृशा वर्णना इयम्।

चित् इति योगेन उपमा।

"चतुरश्चिद्ददमानाद्विवभीयादा निधातोः।"[२६]

इत्यस्मिन विषये सायनभाष्यम् -"चित् इत्युपमार्थे वदति"[२७]

वा इति निपातयोगेन उपमा :

"मक्षु देववतो रथः शुरो वा पृत्सु कासु चित्"[२८]

उक्तं च सायणाचार्येन-"वा इति शब्दोहत्र उपमानवाची"[२९]

तथा कतिपयानि उदाहरणानि अत्र उल्लेखितमिच्छिमि।

यथा-

"उष्ठामिव मध्वाग्ने वदन्ता स्तनाविव पिप्यतं जीवसे नः।

निस्वार्थ नस्तन्वो रक्षिता कर्णाविव सुश्रुता।"[३०]

यथा पिता पुत्रेभ्यः अनायसप्राप्तः भवति तथैव अग्नि देवता अपि अस्माकं निकषा।

"पितेव सूनवे अग्ने सूपायनो भव सचस्वा न स्वस्तये।"३१ संक्रीडति

"अप त्ये तायवो यथा नक्षत्रा यन्तुक्तुभि:"३२

अर्थात् सूर्यस्यागमनेन नक्षत्राः तस्करान् इव पलायन्ति। उपमालङ्काहस्य अपरूपः दृष्टान्तोहयम्।

पूर्णोपमायाः उदाहरणानि:

"श्वघ्नीव यो जिगीवां लक्षमाददर्यः पुष्टानि स जनास इन्द्रः"[३३]

यत्र सामान्यधर्ममौपम्यवाचकं पदमुपमेयमुपमानम् दृश्यन्ते सा पूर्णोपमा। वेदेषु पूर्णोपमायाः उदाहरणानि सन्ति भूयिष्ठानि।

वैदिकसाहित्ये मालोपमायाः उदाहरणानि।

"रयिर्ण यः पितृवत्तो वयोधाः सुप्रणीश्चिकितुषो न शासु:"[३४]

"जायेव पत्य उषती सुवासा उषा हस्रेव निरिणीते अप्सः"[३५]

अत्र उषा देवी (क)भर्तृरहिता (ख) गतभर्तृका (ग) पति अभिलाषिणी इत्यनेन मालया इव उपमीयते।

**उदाहरणमपरमम् -**

"सूर्यस्येव वक्षथो ज्योतिरेषां समुद्रबस्येव महिमा गभीर।

वातस्येव प्रजवो नान्येन स्तोमो वसिष्ठा अन्वतवे व:"[३६]

अर्थात् वशिष्ठपुत्राणां महिमा सूर्यस्य ज्योतिरिव प्रकाशितः, समुद्रस्य इव गभीरः,वातस्स्य इव वेगवान्।

अथ लुप्तोपमा। सामान्यधर्मादीनां मध्ये एकस्य वा द्वयोः लोपे लुप्तोपमा इयम्।

यथा -

"संवत्सरं शशयाना ब्राह्मणा व्रतचारिण:

वाचं पर्जन्यजिज्वितां प्र मण्डूका अवादिषु।"[३७]

उपमावाचकं पदमत्र लुप्तम्।

उक्तञ्च सायणाचार्येन- 'लुप्तोपममेतत्।'[३८]

लौकिकसाहित्ये प्रकृति एव प्रसिद्धोपमेयम्।

यथा -"मुखमिन्दुर्यथा"इत्यत्र मुखं चन्द्रमिव सुन्दरम्। अत्र तस्य मुखं चन्द्रेन सह उपमितम्।

किन्तु वैदिकसाहित्ये प्रकृतिः स्वयमेव उपमानरूपेण प्रतीयते। लोकप्रसिद्धानि उपमानानि अत्र उपमेयरूपैः शोभन्ते। यथा -

"उशतीरिव मातरः" [३९]
अग्निदेवता एव "घृतं न पूतं तनूररेपाः शुचि हिरण्यम्"[४०]

अग्नेः रूपं पूतं आज्यमिव पवित्रं शोधितम्, हिरण्यमिव शोभितम्।

न केवलं ऋग्वेद:, ततो यजुर्वेदः अथर्ववेदोहपि काव्यमण्डितम् । सामवेदः अस्माकं संगीतशास्त्रस्य प्रारम्भमेव सूच्यते।

**अथर्ववेदस्य उदाहरणमिदम् -**

"यथा द्यौश्च पृथिवी च न विभीतो न रिष्यतः"[४१]
"सा नो भूमिर्विसृजतां माता पुत्राय मे पयः"[४२]
यथा माता पुत्रं दुग्ध दधाति तथैव माता भूमि अपि अस्माकम्।
वेदेषु अपि चक्रवाकस्य उपमा प्रसिद्धा। उत्तरकाले इयमुपमा कवीनांश प्रियमिति विलसति।
"इह इमौ इन्द्र संनुद चक्रवाकेव दम्पती" [४३]
मातेव पुत्रं विभृतामुपस्थे [४४]
"स्तौमग्नौ दिवीव रुक्म" [४५]
अभि त्वा शूर नोनुमः अदुग्धा एव धेनवः।[४६]
"अभिरिव भोगै पर्यते वाहुं" [४७]

**उपसंहारः**

सुविशालमिदं वैदिकसाहित्यम्। अस्मात् विपुलकाव्यसम्भारात् अत्यप्लानि उदाहरणानि अस्मिन् निवन्धे उल्लेखितुं शक्नुमि। वेदः अस्माकं धर्मग्रन्थमाकरग्रन्थंच। तथापि साहित्यमिदं काव्यगुणसमन्वितम्, सुशोभितमं नस्ति इत्यत्र कचित् संशयः।संहिता-ब्राह्मण-आरण्यक-उपनिषत् इति सर्वत्रैव उपमालङ्कारस्य प्रयोगपारिपाट्यं दृश्यये। सभ्यतायाः प्रारम्भिकीसमये एतादृशालंकाप्रयोगपारिपाट्यम् दृष्ट्वा सर्वे गुणीनः चमत्कृता सन्ति ।।

**ग्रन्थसूची-**


1. सायणाचार्यप्रणीता ऐतरेयब्राम्हणभाष्यभूमिका।
2. मुण्डकोपनिषद् २/७
3. मनुमहाराजप्रणीता मनुसंहिता २/६
4. महाभारतम् । शान्तिपर्वः १९/२१०
5. पराशरसंहिता १/२०
6. छान्दोग्यउपनिषत् ७/१/२ मुण्डकोपनिषद् १.१.६
7. भामहाचार्योन
8. दण्ड्याचार्येन विरचितं काव्यादर्शः २/१
9. वामनाचार्येनरचितंकाव्यालंकारःसूत्रवृत्तिः१.१.१
10. तदेव १.१.२
11. राजशेखरविरचिता काव्यमीमांसा।
12. निरुक्तकारयास्कप्रणीतमं निरुक्तम् १/२/१/५
13. तदेव ३/१३/२३
14. ऋग्वेदसंहिता १.२.१
15. यास्कप्रणीतं निरुक्तः १०.२
16. सायणभाष्यम् ऋग्वेदसंहिता १.२.१
17. ऋग्वेदसंहिता १/१४/५
18. ऋग्वेदसंहिता ४/१०/६
19. ऋग्वेदसंहिता ४/१०/५
20. निरुक्तः १/४
21. ऋग्वेदसंहिता ५/७८/८
22. तदेव २/३५/१०
23. तदेव १/४५/३
24. तदेव १/१२४/७
25. तदेव १/११५/२
26. तदेव १/४१/९
27. सायणभाष्यम्। तदेव १/४१/९
28. ऋग्वेदसंहिता ८/३१/१५
29. तदेव सायणभाष्यम् ८/३१/१५
30. तदेव २/३९/६
31. तदेव १/१/९

32.सायणभाष्यम् ८/३१/५
33.ऋग्वेदसंहिता ५/७८/८
34.तदेव १/१/९
35.ऋग्वेदसंहिता १/५०/२
36.ऋग्वेदसंहिता २/१२/४
37.तदेव १/७३/१
38.तदेव १/१२४/७
39.ऋग्वेदसंहिता ७/३३/८
40.तदेव ७/१०३/१
41.सायणभाष्यम्, तदेव ७/१०३/८
42.ऋग्वेदसंहिता १०/९/२
43.तदेव ४/१०/६
44.अथर्ववेदः ३.१५.१.५
45.अथर्ववेदः १२/१/१०
46.अथर्ववेदः १४।२/६४
47.शुक्लयजुर्वेदः १५.२५
48.शुक्लयजुर्वेदः २७.२५
49.शुक्लयजुर्वेदः २९.५१